# ब्रह्माण्डमण्डलपरिज्ञानम् (३)

**डॉ. रामदेव साहू**
प्रोफेसर एवं विभागाध्यक्ष (वेदविज्ञान)
विश्वगुरुदीप आश्रम शोध संस्थान, जयपुर (राज.)

अथाधिभौतिकाधिदैविकयोः सम्मिश्रणेनैवाध्यात्ममण्डलस्योत्पत्तिः जायते। अस्मिन्नध्यात्मप्रपञ्चेऽपि पञ्च मण्डलानि विज्ञातव्यानि-अव्यक्तात्मा स्वयम्भूः, महानात्मा परमेष्ठी, विज्ञानात्मा बुद्धिः, प्रज्ञानात्मा मनः, जीवात्मा प्राणिशरीरम्। तत्र सर्वप्रथमं प्राणस्य गुहामण्डले संसक्तत्वात् अव्यक्तात्मा आविर्भवति। अयम् अव्यक्तात्मा सर्वत्र व्याप्तो भवति। प्राणिशरीरे, प्राणिशरीराद् बहिर्भागेऽपि, जडपदार्थेऽपि। अयमव्यक्तरूपेणैव विद्यमानो भवति। तत्पश्चात् वायुसंस्थानामपां भूमण्डलीयानामपां च सम्मिश्रणेन महानात्मा आविर्भवति। अयं महानात्मा केवलं सजीवेष्वेव स्थानं लभते। अहंकारस्य सम्पर्कादयमेव कर्त्तृत्वभोक्तृत्वयोरधिष्ठातृत्वेन प्राणिशरीरे सक्रियतामाप्नोति।

तत्पश्चात् सौरवाचो ज्योतिषां मिश्रणेन बुद्धेराविर्भावो भवति। एताः सौरवाचः सौरज्योतींषि च प्राणिशरीरे प्रविष्टाः मिथः संपृक्ताः बुद्धिरूपे परिणता भवन्ति। अयमेव विज्ञानात्मा शरीरस्थमहानात्मनः संसर्गाद्रसमेव कर्त्तृत्वं निश्चाययति शरीरं च तदर्थं प्रेरयति। ततोऽग्निमये सोमेऽग्निरहितस्य चन्द्रमण्डलस्थसोमस्य च संमिश्रणात् मन आविर्भवति। अग्निमयः सोमः अन्नवर्त्ती भवति। सोऽन्नेन सह प्राणिशरीरान्तर्गच्छति। यदा चन्द्ररश्मयः तेन सह संपृक्ता भवन्ति, तदा चन्द्ररश्मिस्थसोमस्य अन्नवर्त्तिना सोमेन सह संसर्गो जायते। तेन मनः उद्भवति क्रमेण विकासञ्चाप्नोति।

शरीरमन्नादः। शरीरस्य अव्यक्तात्म-महानात्म-विज्ञानात्म-प्रज्ञानात्मनां चतुर्णामायतनभूतमिदं शरीरमेव। पूर्वं पृथ्वीपिण्डस्थोऽमृताग्निरेवान्नादरूपेण तिष्ठति। स एव पुनः सूर्यरश्मिस्थमर्त्याग्निना संपृक्तो भूत्वा पिण्डरूपतां गृह्णाति। तत्पिण्डमेव प्राणिशरीरम् विज्ञातव्यम् । अमृताग्निरस्य जीवनं, मर्त्याग्निश्च तन्नियामकं तत्त्वान्तरं विज्ञेयम्। प्राणिशरीरान्तर्विद्यमानत्वादेव अव्यक्तात्म-महानात्म-विज्ञानात्म-प्रज्ञानात्मनां समष्टिः प्राणेन सहैकीभूय जीवात्मेति प्रोच्यते। यदा सौररश्मिस्थमर्त्याग्निः प्राणिशरीरेस्थाममृताग्निं क्षीणतमां करोति, तदैव प्राणी मृत्युं लभते। उक्तं च विषयेऽस्मिन्-

**'यदेवेह तदमुत्र यदमुत्र तदन्विह।**

**मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति [1]।।'**

पञ्चस्वेवैतेष्वपि मण्डलेषु भिन्नभिन्नजातीयाः पदार्था उत्पद्यन्ते। उत्पन्नेभ्यस्तेभ्यः एव पदार्थेभ्यस्तत्तन्मण्डलस्य स्थितिर्जायते। अतएव एते पदार्था श्रुतौ 'मनोता' शब्देनोक्ताः। तेषु तेषु पदार्थेषु तत्तन्मण्डलानां मनांसि ओतप्रोतानि भवन्ति, अतएव ता मनोताः कथ्यन्ते। यथोक्तमेतरेयब्राह्मणे-

**'तिस्रो वै देवानां मनोताः। तस्यामेव तेषां मनांस्योतानि। वाग्वैदेवानां मनोता। तस्यां हि तेषां मनांस्योतानि। अग्निर्वै देवानां मनोता। तस्यां हि तेषां मनांस्योतानि [2]।।'**

छान्दोग्यश्रुतावप्तेतेषां विषये सम्प्रोक्तम् -

**यानि पञ्चधा त्रीणि त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति।**

**यस्तद्वेद स वेद सर्वं सर्वा दिशो बलिमस्मै हरन्ति [3]।।'**

उक्तोल्लेखेन विज्ञायते यत् प्रतिमण्डलं मनोतात्रयमुत्पद्यते। तत्रादौ स्वयम्भूमण्डले वेदाः, सूत्रं, नियतिश्चेति तिस्रो मनोता उत्पद्यन्ते। तत्र वेदाः शब्दाः मन्त्रवाक्यविनिर्दिष्टाः। पूर्वं शब्दसृष्टिः संजाताः पश्चादर्थसृष्टिः। अर्थसृष्टावेतेषां शब्दानां प्रामाण्यम्। अस्मादेव च वेदानां परमं प्रामाण्यम्। स्वयम्भूमण्डले ये शब्दास्त एव ब्रह्मास्तित्वबोधकाः। तस्मादेव च शब्दब्रह्मपरिकल्पना बुधैर्वैय्याकरणैर्विशेषेण प्रतिपादिता। तन्मतानुसारेण शब्दा नित्याः। ब्रह्मनित्यत्वानुगुणं शब्दनित्यत्वम्। शब्दैरेवार्थानामन्वर्थता। तेन लोके पदार्थनां संज्ञाकरणं शब्दैरेवारब्धम्। उक्तं च -

**''अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा।**

**आदौ वेदमयी नित्या यतः सर्वाः प्रवृत्तयः।।**

**नामरूपे च भूतानां कर्मणां च प्रवर्तनम्।**

**वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः [4]।।''**

सूत्रं क्रियानैरन्तर्यम्। क्रिया पुनः विनाशस्वरूपा। एषा कालेन आबद्धा । कालनैरन्तर्यात् क्रियानैरन्तर्यं भासते। पदार्थास्तु पुनः क्रियापेक्षयैव व्यवहारविषयतामापद्यन्ते। क्रियाया विनाशस्वरूपादेव लौकिकानां समेषां पदार्थानां

क्षणिकत्वम् वक्तव्यम् सत्स्वपि सर्वेषु पदार्थेषु क्षणिकेषु क्रियारम्भात् क्रियावसानं यावदस्तित्वं नित्यब्रह्मण एवास्तित्वम् नान्यत्। यतो हि यत्रापि सत्तायां नित्यत्वं भासमानं भवति, तत्रैव ब्रह्मावतिष्ठते। ब्रह्मणैव पदार्थाः सूयन्ते त्रायन्ते च। तस्मात् क्रियारूपे भासमानमपीदं सूत्रं ब्रह्माभिन्नमेव। अतएवोक्तम्-

**'प्रत्यस्ताशेषभेदं यत् सत्तामात्रगोचरम् ।**

**वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्** [5]**।।'**

नियतिः प्रकृतिः। स्वयम्भूमण्डलमेव यथा वेदानां सूत्राणां चाश्रयस्तथैव नियतिरूपायाः प्रकृत्या अपि आश्रय इति विज्ञेयम्। नियमनशीलत्वान्नियतिरित्याख्यायते। एषा सूत्ररूपेण प्रवर्तमानानां क्रियाणां नियमनं करोति। एवञ्चेदियं शक्तिरूपा। क्रियाप्रवृत्तौ गतिकारकं तत्त्वमिदम्। अपि च क्रियानैरन्तर्यसंरक्षकमपि तत्त्वमिदमेव। स्वरूपादर्शनादेषा अनिर्वचनीया। इयमेव नियतिरहंकारस्य जनयित्री। तेन सर्वं कार्यजातं कर्त्तृत्वसापेक्षं प्रतीयते, किन्तु कर्त्तुरदर्शनाद् कर्त्तृरूपे ब्रह्मैवानुमीयते। एवं चेदियं ब्रह्मशक्तिरप्युद्दिष्टा।

अथ परमेष्ठिमण्डलेऽपि भृगुः-अङ्गिरा-अत्रिरिति तिस्रो मनोता उत्पद्यन्ते। आसां तिसृणां मनोतानामपि प्रकृते सम्बन्धः। तस्माद्भिन्ना अपि इमा अभिन्नत्वेन अर्थात् युगपद्भावेनैव कार्यं कुर्वन्ति। आसु या भृगुरिति ख्याता सा त्रिविधा, आपः वायुः सोमश्चेति भेदात्। तत्र घनतरलविरलावस्थात्रयेन आपः वायुः सोम इति त्रयो भृगवः संजायन्ते। एवमेवाग्निर्यम आदित्यश्चेति त्रयोऽङ्गिरसश्च। यश्च तृतीयः अत्रिप्राणो भृग्वङ्गिरोत्पन्न सः न त्रिविधः। अतएव न त्रिरिति व्युत्पत्त्या स अत्रिरिति उच्यते। एवमिदं परमेष्ठिमण्डलं भृग्वंगिराऽत्रित्रयात्मकम्। यच्च आपः स भृग्वङ्गिरोमयम्। उक्तञ्चश्रुतौ-

**'आपो भृग्वङ्गिरोरूपम् आपो भृग्वङ्गिरोमयम्।**

**अन्तरेते त्रयो वेदा भृगूनङ्गिरसः श्रिताः**[6]**।।'**

इमा आपश्चतुर्धा - अम्भः मरीचिः मरः श्रद्धा चेति। एतास्वम्भःपरेण दिवं द्यौः प्रतिष्ठा। सूर्यरश्मयोऽम्बुमया मरीचयः। पृथ्वीरूपेण परिणता आपो मरः। चन्द्ररश्मिमयाः सौम्या आपः श्रद्धा चेति। वातीति वायुः। स चापरःप्राणः। श्वासोच्छ्वासरूपः। सविता अस्य वायोः प्रणेता। वायुश्चायं अन्नसम्पादको बलसम्पादकश्च। यथोक्तं यजुर्वेदे -

**'इषे त्वोर्जे त्वा वायवः स्थ देवो वः सविता प्रार्पयतु।**

**श्रेष्ठतमाय कर्मण आप्यायध्वम्** [7]**।।'**

वायुश्चायम्आप्यायनकरः। तस्मादेव वृष्ट्यादौ कारकत्वादन्नसम्पादकत्वमस्योपपद्यते।

अस्यैव वायोः रूपद्वयम्-सूक्ष्मवायुः स्थूलवायुश्च। अनयोर्यः सूक्ष्मो वायुः स तेजनं मातरिश्वा वा। मातरि अन्तरिक्षे श्वसिति गच्छतीति। अयं हि भृगवे वह्निं भरत् दीप्तितमायै पृथिव्यै तेजोधारकः उक्तो ऋग्वेदे-

'वह्निं ...............भरद् भृगवे मातरिश्वा [8]।'(ऋ. - 1/60/1) इति।

यश्च स्थूलो वायुः सः प्रवहङ्करः सदागतिश्चोक्तः। स एव प्राणादीनामालम्बनकरः। तस्मादेव च वायुर्वै प्राणः। प्रवहङ्करत्वात्परमेष्ठिमण्डले स एव ग्रहनक्षत्रतारकादीनां गतिं करोति। अयं च यः सोमः आपोमये परमेष्ठिमण्डले उत्पद्यते, सः एव निखिलविश्वजातान् पदार्थान् पवित्रीकरोति। पवित्रीकरणशक्तिरस्मिन्नेव सोमे वर्तते। सोमसंसर्गाद् दूषिताः परमाणवस्तत्क्षण एव नष्टा भवन्ति। अयं हि 'तृतीयस्यां वै दिवि सोम आसीद्' इति श्रुत्या सोमः। सूर्यादप्यूर्ध्वम् अस्य स्थानम्। अयमेव च समेषां जनिता। यथोक्तमृक्संहितायाम्-

**'सोमः पवते जनिता मतीनां**

**जनिता दिवो जनिता पृथिव्याः।**

**जनिताग्नेर्जनिता सूर्यस्य**

**जनितेन्द्रस्य जनितोत विष्णोः [9]।।'**

एष सोमः अम्भोमयो भवति। सूर्यमण्डलं च भित्त्वा पृथ्वीमण्डलं प्रति गन्तुं प्रवर्तते। सूर्यमण्डलभेदनकाले सौराग्नेयप्राणैः सहास्य संघर्षो भवति। तदानीं तैरयमुत्तरस्यां प्रक्षिप्यमाणो भवति, ततश्चन्द्रमण्डलमागच्छति। तदेवास्यापरं निधानम्। तत एव स्थूलापां समूहे सम्मिश्रितो भूत्वा प्रवहति। स्थूलवायौ मिश्रितो वा प्रवहति।

अथ सूर्यमण्डलेऽपि ज्योतिर्गौरायुश्चेति तिस्रो मनोता उत्पद्यन्ते। एताः सूर्येऽभिप्लवा भवन्ति। तत्र तेजोविकिरणं ज्योतिः। अथवा निराकारोऽग्निप्राणो यावदेनं सोमं दहति तावज्ज्योतिरिति। तच्च सूर्यरश्मिनिष्ठम् । प्रकाशस्तस्य स्वरूपम्। प्रत्नरेतस्तस्य मूलम्। यथोक्तमृक्संहितायाम् -

**'आदित्प्रत्नस्य रेतसो, ज्योतिःपश्यन्ति वासरम्। परो यदिध्यते दिवा [10]।।'**

प्रत्नरेतसः सोमादाविर्भूतमिदं यत्रापि सूर्यज्योतिर्निपतति तत्रैवौष्ण्यानुभूतिर्जायते। मृताग्न्यमृताग्न्योश्च संयोगादिदं सूर्यज्योतिरेव पार्थिवजीवानामुत्पत्तिविनाशयोर्महतीं भूमिकां निर्वहति। अमृताग्न्यंशादिदं जीवोत्पत्तेः, मृताग्न्यंशाज्जीवविनाशे, जीवशरीरस्यामृताग्न्यंशग्रहणक्षमत्वपर्यन्तं च जीवनस्य हेतुर्भवति। तदा जीवशरीरम्

अमृताग्न्यंशग्रहणेऽक्षमो भवति, तदा केवलं मृताग्न्यंशस्य प्राबल्येन ग्रहणाज्जीवनक्षयो भवति। ज्योतिष एव अस्मात्सूर्यमण्डले ज्योतिर्मयाः त्रयस्त्रिंशद् देवा उत्पद्यन्ते।

गौः सूर्यरश्मिः। सूर्यरश्मयश्च ऋषभायत्ताः। ऋषभः सूक्ष्मो वायुः। स चासामन्तःस्थो गतिकारकः। अतएवोक्तम् - 'गोभिष्ट्वा पात्वृषभो इति। सूर्यमण्डलस्योर्ध्वभाग आसां स्थानम्। तदेव पौराणिकैः गोलोक इत्यप्याख्यायते। गावश्चैता रश्मयः संस्तविकदेवायत्ताः। चन्द्रमा वायुः संवत्सरश्चेति संस्तविकाः। एषु चन्द्रः गोभ्यः रसादानं करोति। वायुः रश्मिभिश्च रसाधानं करोति। संवत्सरश्चासामाकलनं करोति। सौराग्निर्ज्योतिषां रश्मिष्वाधानं करोति। सूर्यमण्डलं भित्त्वा इमा गावः सर्वप्रथमं सूर्यमूर्घ्नि प्रतिष्ठिता भवन्ति। ततो रुद्राणां ( सूर्यमण्डलोपरि विद्यमानानां वायूनां ) प्रहारेण सर्वासु दिक्षु प्रसरन्ति। शब्द-स्पर्श-रूप-रस-गन्धाः सर्वाणि च भूतानि गोभिरेव सृज्यन्ते। आसां गवां सहस्रभक्तयः। उक्तञ्च ताण्ड्यश्रुतौ-

''**यावद्वै सहस्त्रं गाव उत्तराधरा इत्याहुस्तावदस्माल्लोकात् स्वर्गो लोकः**[11]''अतएवैतं सूर्यं सहस्रांशुमाचक्षते। गवां साहचर्येणैव सहस्रञ्चैतेऽहर्गणाः बिम्बपृष्ठात् प्रधिपर्यन्तमातताः परितः सम्पद्यन्ते। तस्मादेव सहस्रवर्त्मा साम इति संगच्छते। तत्रैताः सहस्त्रं गावो देवेभ्यः सर्वाणि दुग्धानि दुहते । तासु त्रीणि त्रिंशच्चत्रीणि च गावो वसूनाम्। तावदेव रुद्राणाम्। तावदेवादित्यानाम्। अथ या तासामेकाऽवशिष्यते सा प्राजापत्या त्रिरूपा कामगवी सम्प्रोक्ता। इमा गावः पृथिव्याः अन्तरधोविद्यमानं वराहं प्रति गतिं कुर्वन्ति। उक्तं च-

''**अग्नौ ह देवा घृतकुम्भं प्रवेशयाञ्चक्रुः। ततो वराहः संबभूव। तस्माद्वराहो मेदुरः।**

**घृताद्धि सम्भूतः। तस्माद् वराहे गावः सञ्जानते**[12]।''

**सन्दर्भाः**

1. ऐतरेयआरण्यक-2/6
2. ऐतरेयब्राह्मण-2/10
3. छान्दोग्योपनिषद्-2/2/21
4. वाक्यपदीयम्-ब्रह्मकाण्डम्
5. ब्रह्मविज्ञानम्-1/118
6. महर्षिकुलवैभवम् / पृ.66
7. शुक्लयजुर्वेद - 1/1
8. ऋग्वेद - 1/60/1
9. ऋग्वेद-9/96/5
10. ऋग्वेद-8/6/30
11. तांड्यब्राह्मण-16/8
12. शतपथब्राह्मण-5/4/3/19